॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ११४

बहूनि नाम वर्षाणि गतस्य सुमहद्वनम् ।
शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनम् ॥ १॥

कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ २॥

राघवस्य हरीणां च कथमासीत्समागमः ।
कस्मिन्देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः ॥ ३॥

स पृष्टो राजपुत्रेण बृस्यां समुपवेशितः ।
आचचक्षे ततः सर्वं रामस्य चरितं वने ॥ ४॥

यथा प्रव्रजितो रामो मातुर्दत्ते वरे तव ।
यथा च पुत्रशोकेन राजा दशरथो मृतः ॥ ५॥

यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात्प्रभो ।
त्वयायोध्यां प्रविष्टेन यथा राज्यं न चेप्सितम् ॥ ६॥

चित्रकूटं गिरिं गत्वा राज्येनामित्रकर्शनः ।
निमन्त्रितस्त्वया भ्राता धर्ममाचरिता सताम् ॥ ७॥

स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम् ।
आर्यस्य पादुके गृह्य यथासि पुनरागतः ॥ ८॥

सर्वमेतन्महाबाहो यथावद्विदितं तव ।
त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध मे ॥ ९॥

अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजम् ।
प्रविवेशाथ विजनं सुमहद्दण्डकावनम् ॥ १०॥

तेषां पुरस्ताद्बलवान्गच्छतां गहने वने ।
विनदन्सुमहानादं विराधः प्रत्यदृश्यत ॥ ११॥

तमुत्क्षिप्य महानादमूर्ध्वबाहुमधोमुखम् ।
निखाते प्रक्षिपन्ति स्म नदन्तमिव कुञ्जरम् ॥ १२॥

तत्कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ ।
सायाह्ने शरभङ्गस्य रम्यमाश्रममीयतुः ॥ १३॥

शरभङ्गे दिवं प्राप्ते रामः सत्यपराक्रमः ।
अभिवाद्य मुनीन्सर्वाञ्जनस्थानमुपागमत् ॥ १४॥

चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् ।
हतानि वसता तत्र राघवेण महात्मना ॥ १५॥

ततः पश्चाच्छूर्पणखा रामपार्श्वमुपागता ।
ततो रामेण सन्दिष्टो लक्ष्मणः सहसोत्थितः ॥ १६॥

प्रगृह्य खड्गं चिच्छेद कर्णनासे महाबलः ।
ततस्तेनार्दिता बाला रावणं समुपागता ॥ १७॥

रावणानुचरो घोरो मारीचो नाम राक्षसः ।
लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः ॥ १८॥

सा राममब्रवीद्दृष्ट्वा वैदेही गृह्यताम् इति ।
अहो मनोहरः कान्त आश्रमे नो भविष्यति ॥ १९॥

ततो रामो धनुष्पाणिर्धावन्तमनुधावति ।
स तं जघान धावन्तं शरेणानतपर्वणा ॥ २०॥

अथ सौम्या दशग्रीवो मृगं याते तु राघवे ।
लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा ।
जग्राह तरसा सीतां ग्रहः खे रोहिणीम् इव ॥ २१॥

त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम् ।
प्रगृह्य सीतां सहसा जगामाशु स रावणः ॥ २२॥

ततस्त्वद्भुतसङ्काशाः स्थिताः पर्वतमूर्धनि ।
सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः ।
ददृशुर्विस्मितास्तत्र रावणं राक्षसाधिपम् ॥ २३॥

प्रविवेश तदा लङ्कां रावणो लोकरावणः ॥ २४॥

तां सुवर्णपरिक्रान्ते शुभे महति वेश्मनि ।
प्रवेश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः ॥ २५॥

निवर्तमानः काकुत्स्थो दृष्ट्वा गृध्रं प्रविव्यथे ॥ २६ ॥

गृध्रं हतं तदा दग्ध्वा रामः प्रियसखं पितुः ।
गोदावरीमनुचरन्वनोद्देशांश्च पुष्पितान् ।
आसेदतुर्महारण्ये कबन्धं नाम राक्षसं ॥ २७ ॥

ततः कबन्धवचनाद्रामः सत्यपराक्रमः ।
ऋश्यमूकं गिरिं गत्वा सुग्रीवेण समागतः ॥ २८ ॥

तयोः समागमः पूर्वं प्रीत्या हार्दो व्यजायत ।
इतरेतर संवादात्प्रगाढः प्रणयस्तयोः ॥ २९ ॥

रामः स्वबाहुवीर्येण स्वराज्यं प्रत्यपादयत् ।
वालिनं समरे हत्वा महाकायं महाबलम् ॥ ३० ॥

सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः ।
रामाय प्रतिजानीते राजपुत्र्यास्तु मार्गणम् ॥ ३१ ॥

आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना ।
दशकोट्यः प्लवङ्गानां सर्वाः प्रस्थापिता दिशः ॥ ३२ ॥

तेषां नो विप्रनष्टानां विन्ध्ये पर्वतसत्तमे ।
भृशं शोकाभितप्तानां महान्कालोऽत्यवर्तत ॥ ३३ ॥

भ्राता तु गृध्रराजस्य सम्पातिर्नाम वीर्यवान् ।
समाख्याति स्म वसतिं सीताया रावणालये ॥ ३४ ॥

सोऽहं दुःखपरीतानां दुःखं तज्ज्ञातिनां नुदन् ।
आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः ॥ ३५ ॥

तत्राहमेकामद्राक्षमशोकवनिकां गताम् ।
कौशेयवस्त्रां मलिनां निरानन्दां दृढव्रताम् ॥ ३६ ॥

तया समेत्य विधिवत्पृष्ट्वा सर्वमनिन्दिताम् ।
अभिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः ॥ ३७ ॥

मया च पुनरागम्य रामस्याक्लिष्टकर्मणः ।
अभिज्ञानं मया दत्तमर्चिष्मान्स महामणिः ॥ ३८ ॥

श्रुत्वा तां मैथिलीं हृष्टस्त्वाशशंसे स जीवितम् ।
जीवितान्तमनुप्राप्तः पीत्वामृतमिवातुरः ॥ ३९ ॥

उद्योजयिष्यन्नुद्योगं दध्रे लङ्कावधे मनः ।
जिघांसुरिव लोकांस्ते सर्वाँल्लोकान्विभावसुः ॥ ४० ॥

ततः समुद्रमासाद्य नलं सेतुमकारयत् ।
अतरत्कपिवीराणां वाहिनी तेन सेतुना ॥ ४१ ॥

प्रहस्तमवधीन्नीलः कुम्भकर्णं तु राघवः ।
लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणम् ॥ ४२ ॥

स शक्रेण समागम्य यमेन वरुणेन च ।
सुरर्षिभिश्च काकुत्स्थो वराँल्लेभे परन्तपः ॥ ४३ ॥

स तु दत्तवरः प्रीत्या वानरैश्च समागतः ।
पुष्पकेण विमानेन किष्किन्धामभ्युपागमत् ॥ ४४ ॥

तं गङ्गां पुनरासाद्य वसन्तं मुनिसंनिधौ ।
अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि ॥ ४५ ॥

ततः स सत्यं हनुमद्वचो महन्
निशम्य हृष्टो भरतः कृताञ्जलिः ।
उवाच वाणीं मनसः प्रहर्षिणी
चिरस्य पूर्णः खलु मे मनोरथः ॥ ४६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com